देव-गोष्ठी

(6)

हस्त लिखित

प्रतियोगिता - सम्मेलनम्.

रविवासर - प्रविष्टायां मई मासस्यान्त्यां संस्कृतोत्साहिन्या 'प्रतियोगिता सम्मेलनं' सम्मेलयिष्यते.

विषय-सूचिः

वर्ष १० सं १९८६	सम्पादक: सुरेशचन्द्र: संस्कृतोत्साहित्या प्रकाशिता	अङ्क. १, मास वैशाख. ति० २१-१-८६.

औदास्या वग्रहेण ग्लपित दश दिशो घोर घर्माय मान:
कासारूप: कृतोऽयं पुनरपि सरल: प्रेमपीयूष वृष्ट्या।
तृप्त स्नाता: समन्तात् सहृदय शिखिन: प्रीणिता वायसाली.
जीयान्नित्यं जगत्यां सरल सरसैः सूक्तिकैः देवगोष्ठी ॥

श्री. सत्यपाल:
'उत्सुक'

प्रभु - प्रार्थना.

त्वमेव स्वामिन् शरणो मदीयः सुख प्रदाता जगतश्च रक्षिता ।
क्वाहं व्रजेयं शरणं गृहीतुं नान्योऽस्ति कश्चिद्धितचिन्तको मे ॥.
जपामि मन्त्रं तव रात्रि वासरं पादौ पवित्रौ शिरसा प्रणम्य ।.
दयस्व स्वामिन् मयि प्राप्त कष्टे पारं नयस्वाथ विपत्तिसिन्धोः ॥

अंगीकुरुष्वाद्य ममोपहारं भक्त्या समानीतमिमं हि हृदयम् ।
प्रभो कृपस्वात्र तवास्मि दीनः द्वारे स्थितोऽहं मुहुराह्वयामि ॥.

ले॰ 'कश्चित्'.

नोट -: 'प्रभु जी मेरे तुम हो एक॰' इत्यवलम्ब्य.

"कोऽस्ति तव"?

कोऽस्ति तव?
कोऽस्ति तव स्वजनः?

सर्वं परित्यज्य पूर्वं तावदिदमेव जानीहि यत्कोऽस्ति तव? एते ये खलु विविधविचित्रवाक्यजालेन तव मनो हर्तुं समागच्छन्ति ते खलु असमर्थाः सन्ति तव हृदयाय शान्तिं प्रदातुम्। येऽनाहूता अतिथयो विविधवेषाभरणालङ्कृतदेहास्तव परितो भ्रमन्ति ते तु तव स्वकीया जना इति भ्रमं माकृथाः। ते तु त्वत्तो दूरं योजनशतादपि दूरं वर्तन्ते। ये खलु मनोहराभिराकृतिभिर्वचनावलिभिश्च तव चेतः प्रमोदयितुं प्रयतन्ते। हन्त! तेषां हस्तेषु नास्त्यसौ दीपको यः खलु प्रकाशयेदन्धकाराकृतं पन्थानं सर्वदा तुभ्यमेव। किं त्वमिदं जानासि यद्ये खलु मनोहराभिर्वक्तृताभिस्सम्मान् सम्मोहयन्ति ते तव जीवन तरणीं तारयिष्यन्ति भवसागरादस्मादिति। ये खलु सभा समाजेषु नेतारः सन्ति किं त्वं मन्यसे यत्ते यथावसरं त्वदर्थं समागमिष्यन्ति? किं त्वमनुभवसि यद्ये गगन

येनवत् तमनुधरिते तव
उपकारं समय उपकरिष्यन्ति?
यदा त्वैते सहायकास्त्वया
सह राजमार्गे चलन्ति तदा
यः कश्चित् तूष्णीं भूय
त्वामवलोकय गच्छति
स्यादसौ तव बन्धुः ।
यदा मण्डपेषु नृत्यगान-
परायणेषु तव सहायकेषु
यो मण्डपस्य जनशून्याया
दिश्यमानम् निरीक्षणतिबद्ध
भाव सन्तिष्ठति स एव
बन्धुर्भवेदिति संभावनाऽस्ति।
यः समुद्रान्तर्हितं मुक्ताफल
मिव शालीनतयानम्रतयाच
तुभ्यं स्निह्यन् दूरे वसति,
यः स्वकृत्वां दीपनाय

तपति, तव तपः क्लेशा-
न् स्वान्स्य मुदा पश्यति
निश्चयेनासौ तवास्ति !
विपत्संध्यागमे यदा तव
पुण्यभाजनाः शकुनाः
स्वार्थसाधनाभियानाव-
शंक कार्यविशात् स्वकीयात्
नीडात् प्रति उड्डीयन्ते, तदा
यस्तव निकटेऽवशिष्यते
स एव तवास्ति ।
क्षीणास्विन्द्रियशक्तिषु यदा
आशाभयोऽपि तव संस्कारः
प्लीयते तदा तवावलम्बदात्
यैतन्य यातैः समागच्छति,
स एव तवास्ति ।

यदा सर्वतो निराशा व्याकुली करोति, उत्साहश्च विरली करोति, न कोऽपि सहायकः समागच्छति। यदा च निस्सहायतायाः पराकाष्ठा भवति तदा यः समयानुकूलतया करमवलम्ब्य त्वामुत्थापयति स एव तवास्ति।

यदि कदाचित्त्वयास्य प्रतिमाऽपि दृश्येत्तदा तस्यां दृष्टिपातेनावधातव्यं त्वया॥ एतादृशं दृष्टिपातं कुरु येनामरणं नयनगोचरा स्यादेषा प्रतिमा। यदि कदाचिच्चरणावस्थायां त्वयास्याकृतनामयकरस्य अवलम्बनं स्यात् तदा कदापि मा जहाहि। समागमिष्यन्ति संसारेऽस्मिन्नानाविधा आपदः। तव नाममात्र बान्धवास्त्वां परित्यज्य गमिष्यन्ति। स्नेहाधीनाः सखायस्त्वां दूरतोऽवलोकयिष्यन्ति। मित्राण्यपि त्वां तिरस्करिष्यन्ति, परं दत्तावधानतोऽस्य करावलम्बनं मा जहाहि। भविष्यत्ययमेव दुस्तर दुःखोदधितरणे समर्थ इति।

भ्रातः। संसारेऽस्मिन्नयं निजोऽयं पर इतीयकां

कठिनं वर्तते। यदि परः स्वकीयत्वेन स्वीकृतस्तदा निरवधिपश्चात्तापो भविष्यति।

पश्चात्तापः! पश्चात्तापः! पश्चात्तापो न किमप्यतोऽस्ति।

अत एव कथनस्याव-श्यकता भवति यत् पूर्वमिदमेव जानीहि यत् "कोऽसि त्वं?"

"कोऽसि तव स्वजनः?"

(तरङ्गितहृदयम्)

अनुवादकः श्री विनोदचन्द्रः

सुभाषिते

भवति हृदयहारी कोऽपि कस्यापि हेतुः
न खलु गुणविशेषः प्रेम बन्धप्रयोगे।
किसलयितवनान्ते कोकिलारावरम्ये
विकसति न वसन्ते मालती कोऽत्र हेतुः॥

× × × ×

आलक्ष्यदन्तमुकुलाननिमित्तहासा-
नव्यक्तवर्णरमणीय वचः प्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान्वहन्तो-
धन्यास्तदङ्गरजसा मलिनी भवन्ति॥

"आर्यसमाजः"

इदं तु स्पष्टमेव यत् श्रीमतः स्मरणीयस्य महर्षेर्दयानन्दस्यार्यसमाजस्य स्थापनरूपप्रयत्नउद्देश्यं वा सामाजिकोन्नति धार्मिकोन्नतिरेवासीत्। यदा तेन भारतस्य वर्षस्य महती दुरवस्था दृश्यत तदा तस्य करुणामयं हृदयं तमवस्थामवलोकयितुं नाशक्नोत्। असौ [illegible] कार्यक्षेत्रे प्रवृत्तो बभूव। अद्य वयं तस्य कार्याणां, प्रयत्नानां च मूर्तरूपं पश्यामः, - स आर्यसमाज एव। अद्य तु इदं प्रत्यक्षं जातं यदार्यसमाजो धार्मिकी संस्था। अस्याः प्रमुखं कार्यं किल धर्मप्रचार एव। यदा धर्मे तस्योद्देश्यानां निकृष्टरूपाण्येवावशिष्यन्ते रूढिवादाश्च तमाच्छादयन्ति तदा तस्य समाजोऽपि विकारं प्राप्नोति। अतएव रूढिवादान् दूरीकर्तुमार्यसमाजः प्रवृत्तो वर्तते।

कस्या अपि संस्थाया भवन्ति बहवो नियमाः नियमयितुं तस्याः सभ्यान्। न कोऽपि सभ्यस्तान् नियमानुल्लंघयितुं [illegible] शक्नोति। एवं कस्या अपि धार्मिकसंस्थाया बहवो धार्मिकनियमा भवन्ति न कोऽपि तानुल्लंघयितुं समर्थः। आर्यसमाजस्य धार्मिकसंस्थाया अपि बहूनि

देवगोष्ठी

धार्मिककर्तव्यानि सन्ति।—
षोडश संस्काराः, सन्ध्याग्निहोत्रम्,
वेदेषु, ईश्वरे च विश्वासो निरा-
कारेश्वरोपासना, मूर्तिपूजाखण्ड-
नादीनि। आसां धार्मिकसंस्थानां
धार्मिकरूपं स्वरूपं वर्ततीयम् —
तत्तु सर्वेषां कर्तव्यमेव। परं केवलं
तस्यापि धार्मिकसंस्थाया धार्मिक-
कृत्यान्येव, परं तस्या अन्यधर्मा
वलम्बिभिः संबद्धानि स्वदेशजाति-
हितरतानि सामाजिकानि कर्तव्या-
न्यपि भवन्ति। यथा — आर्यसमा-
जस्य दलितोद्धारो, विधवावि-
वाहो दरिद्राणां साहाय्यं, बाल-
विवाहनिषेधादीनि। इमानि —
सामाजिककृत्यानि तु देशका-
लानुसारीणि। देशकालानुसार-
मेवेमानि समाप्तानि भवन्ति च
ग्राह्याणि भवन्ति। अत इदं स्पष्ट-
मेव यदिमानि कर्तव्यान्यकुर्वन्न-
पि कोऽपि पुरुष आर्यसामाजिक
एव। यतो हि न सर्वेषां सदृश्येव
परिस्थितिः। विदेशवास्तव्य-
आर्यसामाजिकः कथमिमानि
कर्तुं शक्तः। परमेतेषु सामाजि-
ककार्येष्वपि बहून्यपरिहर्तव्या-
नि यतो हि तेषामसत्वे नाभावोऽसं-
भवः। यथा मद्यपाननिषेधः।
अस्य कार्यस्य निषेधोऽपि संभवः,
परं नास्य समूलोच्छेदिता।

अधुनायं प्रश्नः स्वाभाविक
एव यद्देशकालानुसारेण सामा-
जिककार्याणि कर्तव्यानि, तदा-
र्यसामाजिकाः पुरुषाः राष्ट्रसेवा-

या अङ्गीभूते सत्याग्रहान्दोलने
कथं न भागं गृह्णन्ति ? पूर्वोक्तं
कथनं यदि वयं विचारयामस्तर्हि
प्रश्नस्यास्योत्तरं नितरां सरलं
जायते। इदमेवोत्तरं यत्कोऽपि
ह्यार्यसामाजिकपुरुषोऽस्मिन्भागं
ग्रहीतुं स्वतन्त्रो न तत्र कापि विप्र-
तिपत्तिरस्माकम्। परं प्रश्नकर्ता-
रो निगदन्ति यद्राज्यनीतिधर्मयो:
साहचर्यम्। एतौ तु नितरां भिन्नौ
आर्यसमाजस्तु धार्मिकी संस्था
कथं तस्या: सदस्या अस्मिन्नान्दो-
लने भागं गृह्णीयन्ति। अनया
विप्रतिपत्त्या सुस्पष्टमेव प्रती-
यते यदद्यत्वे प्रष्टॄणामियं
धारणा यद्राजनीति-धर्मौ न सह-
चारिणौ। यदि वयं विचारयामो-
यत्त्वेषामयं प्रभावो मनुष्याणामु-
परि येन ते राजनीतिधर्मयो: सह-
भावं नाङ्गीकुर्वन्ति, तदा स्पष्टमेव
यत्पाश्चात्यसभ्यताया मेवायं प्रभाव:।
पाश्चात्यदर्शने ह्ययोर्भिन्नत्व-
मेव प्रतिपादितम्। अत एव
राजनीतिज्ञा: कुटिलानि कू-
टनीतिपूर्णानि कार्याण्यपि कु-
र्वन्ति कथयन्ति च यत् राजनीत्या-
मेषां नितरामावश्यकता नात्र धर्म-
स्याधिकार:। बहुभि: प्रकारैस्तु राजनी-
ति र्व्यवसायरूपेण स्वीकृता। अद्यत्वे
संसारे राजनीतिज्ञस्य धार्मिकपुरुष-
स्य च पृथक् पृथक् स्थानम्।
मिदं परमिदं महदाश्चर्यं यत् गा-
न्धी महोदयेन द्वावपि स्वीकृत्य प्र-
दर्शितं यत् संभवो धर्मराजनीत्यो:

सह भावेन। तस्य व्यक्तित्वे ध्रुवैव स-
ख्यं प्राप्तम्।

अथ नार्यसमाजस्वरूपनिरूपणान-
न्तरं तस्य च कर्त्तव्य सम्पादनानन्तरम-
स्माकं मुख्यः प्रश्नः " यद्यार्यसमाजेन
समष्टिरूपेणास्मिन्नान्दोलने भागो गृ-
हीतव्यो न वा " सुस्पष्टो जायते।
। मया पूर्वमेवोक्तं यत् सामाजि-
कानि कार्याण्यकुर्वन्नपि प्रकाम आर्य-
समाजी एव। नावश्यकं यदसौ ता-
न्येव कार्याणि कुर्यात् यान्यार्यसमाजे-
न निर्धारितानि परमन्यानि कान्यपि
सामाजिकानि कार्याणि कर्तुं स श-
क्नोति। यद्येवं तर्हि सर्व एवार्यसा-
माजिका, न केवलमार्यसामाजिका ए-
व, परमार्यसमाज। स्वयं कुतः स-
त्याग्रहान्दोलने भागं गृह्णाति। य-
था दलितोद्धारादीनि कार्याणि नितरा-
मावश्यकानि तथैव किल स्वराज्य प्रा-
प्तिरप्यावश्यकी।

परमिदं न मां समीचीनं प्रतिभा-
ति यतो बहूनि कार्याण्यार्यसमाजस्या-
धुनाप्यवशिष्टानि। इदं सत्यं यत्
कस्यापि धार्मिकसंस्थाया धार्मिक-
कृत्यानि विहायान्यानि सर्वाण्यपि
कार्याणि समयानुसारं परिवर्तनं लभ-
न्ते ऽथवा समाप्तिं प्राप्नुवन्ति। परं-
नाधुनार्यसमाजस्य सर्वाणि कार्य-
जातानि समाप्तानि। आस्तां ताव-
दयं विवादः। अहं पृच्छामि यत्
किं नावश्यकी स्वराज्य प्राप्त्यै
सामाजिकोन्नतिः। अहं तु मन्ये
यत्सामाजिकोन्नतिरेवाधारभूता-
स्ति स्वराज्य प्राप्त्याः। अत्र बहवोऽ-

शिक्षिता जना ये न जानन्ति "स्व-
राज्य' शब्दमपि। किन्त्वेदमस्मा-
कं कर्तव्यं यत्तेषामशिक्षां दूरीकु-
र्मः। अहं तु मन्ये यत् द्वे एव
कार्ये अद्यत्वे आवश्यके स्वराज्य-
प्राप्त्यै। कॉंग्रेसीय प्रकाशया-
लयन्तु सत्याग्रहान्दोलनं, वयं सा-
माजिकोन्नतिं विधास्यामः।

श्री विनायकरावः

न त्वहं कामये राज्यं,
न स्वर्गं ना पुनर्भवम्।
कामये दुःख तप्तानां
प्राणिनामार्तिनाशनम्॥

ईश-स्मरणम्

प्रभो! त्वमेवासि ममाद्य त्राता लज्जा मदीयास्ति तवैव हस्ते।
विपत्तिसिन्धो नहि ज्ञायतेऽन्तः निराश्रयाऽत्ते ह्यभिलष्यते दया॥

मन्दा मतिर्मेऽस्ति विवेकहीना न वेत्ति तावत्कमहो महत्त्वम्।
हानिं सहाऽपि चरणौ न सेवे आयुर्विनिष्टं विषयप्रसक्त्या॥

निराशयाच्छन्नमनोऽहं हि घटास्ति घोरा परिवारयन्ती।
नीरश्च दृष्टेः परिलुप्यते पथः त्वमेव स्वामिन् शरणोऽधुना मे॥

कामादिशत्रुभिरथाभिक्रम्यते भीतिश्च भूयोऽपि विधीयते तैः।
बलेन हीनो भृशमद्य दूये स्वामिन् विपत्तिर्महती गरीयसी॥

धर्मञ्च कार्यञ्च न विद्यते मया मोहस्य जालान्न च मुच्यते स्वयम्।
हिताहिते नैव विवेकशक्तिः पुत्रस्तवास्त्यद्य विपत्तिग्रस्तः॥

निजा दया नाथ! प्रदर्शनीया दयामयो ह्यातुरथ प्रदेयः।
क्रोडे स्वकीये उपवेशनीयः यस्मिन्स्थितस्यास्ति न दुःखलेशः॥

ले. 'मधुरः'

नोट:- 'अब वेगि उबारो नाथ०' इत्यवलम्ब्य।

" कुलपते ! "

सरनापस्तं दयामूर्त्तिं स्फुरत्कीर्तिं सदा याम: ।

गुणाँस्ताँस्तान् सुधाशुभ्रान् सदानन्दस्य गायाम: ॥

कथं संसार प्राचीरश्चिरात्संघर्षजेनेदम् ।

फलेनास्तं गुरोर्वंशं सदा धीमानधीयान: ॥

स्मरेत्रामुं हि स्रष्टारं सरस्वन्तं सुधीरत्नम् ।

स वेदोक्तिप्रचाराचारचातुर्यं प्रकुर्वाण: ॥

क्रियारूपेण तानर्थान् श्रुतौ संकीर्तितान् स्वामी ।

प्रसंस्कुर्वन्नमून् पूर्वं पुनर्लोकेषु तन्वान: ॥

मुदा संफुल्लकायो ऽपीक्षणे सामाजिकेषूनार ।

स्रवद्भ्य: पातयन् संघातयन्नासीद् वयं नौम: ॥

सदा माधुर्यमिश्रैस्तैर्वचोभिर्वर्णितां चेत: ।

देवगोष्ठी.

प्रसादाश्वासनोद्भवैः समुद्भावस्य सोपानः ॥
स त्यक्त्वा स्थापितं कूले कुटं कूलंकषायास्तान् ।
नु चण्डीं चण्डिकापन्नां भवस्थानी महामानः ॥
गतः संज्ञाततत्वो वैदिकीचर्याप्रचारार्थम् ।
बहिःक्षिप्तान् समाजेभ्यो जनान् बोद्धुं कृतोद्यानः ॥
अये दीनान् कथं म्लेच्छान्परित्यक्तानहंकृत्वा ।
य उद्धार्यात्मसंवेशे ध्वजं शुद्धेश्च धुन्वानः ॥
इदानीं श्रूयतां भद्राः कथं यात्रा कृता दीर्घा ।
कथं प्राणान् प्रियांस्त्यक्तः कृते शुद्धेर्न मन्वानः ॥
न सोढो मुस्लिमैर्मूढैः कृतः संघातनोपायः ।
न दृष्टः को हितः कस्याहितः किलाम कूरानः ॥

कृत्वाऽऽहुतिं नु भावान्निजदेहसंघम्,
यत्नेषु शुद्धिषु महान् खलु पारदृश्वा ।
अद्यापि तद् भवसि भूतलप्रीतिकारी,
मन्यामहे कुलपते ! प्रणयाय भूयाः ॥

"श्रीरामनाथः"

"लूथर चरितम्"

इह जगति बहवो जनाः कृमि-
कीटादिवत् यथा तथा जीवन यात्रा-
मतिवाहयन्तो जायन्ते म्रियन्ते च।
न तेषां नामापि लोकैः स्मर्यते। परं
कियन्त एवं विधाः पुरुषा भवन्ति
ये स्व गुणगरिम्णा गरीयांसं
गिरिमपि, स्वगाम्भीर्येण गम्भी-
रमकूपारमपि लघयन्ति। तेषां
यशः संचीभूतं सत् चन्द्रमसो-
प्रमम्लापयति। त एव प्रचलि-
तानुचितरूढीनां प्रयतन्तो वि-
च्छेदाय तथा च निर्बललोको-
पकृतौ नूतनपथप्रदर्शका भवन्ति।

एवं विधेषु अंगुलिखण्ड
परिगणनीयेषु पुरुषेषु -
लूथरोऽन्यतमोऽभूत्।

यूरोपीय महाद्वीप खण्डे खी-
स्तीय मतस्य प्रभूतः प्रचारोऽभूत्।
तत्र च तन्मतावलम्बिभिरनेकानि
प्रार्थनामन्दिराणि निर्मापितानि
तथा चेतस्ततः परिभ्रमद्भिः पाद-
रीभिरपि तस्य प्रसारेऽत्याधिकं
साहाय्यं प्रदत्तम्। शनैः शनैरेतेषां
शक्तिरेतावन्मात्रं प्रवृद्धा यद्राज-
निर्वाचनमपि तेषां हस्तगतम-
भूत्।

प्रथमतः एते धर्माध्यक्षाः सदा-
चारपरायणा आसन्। अत एव
च तेषां महान् प्रभावो लोकस्यो-

परि समभूत् ।

रोमस्य प्रार्थनामन्दिरमखिले यूरोप महाद्वीपे प्रधानं प्रार्थनामन्दिरमासीत् । अस्य धर्माध्यक्षस्याध्यक्षत्वे सर्वमेव यूरोप-साम्राज्यमासीत् । प्राक् षोडश-ख्रीस्ताब्दस्य कतिचिद्वर्षेभ्यः कानि-चानि कारणानि समुपस्थितान्यासन्, यैः सर्वे देशाः रोमदेशीय-प्रार्थनामन्दिरधर्माध्यक्षस्य सततं विरोधिनोऽभूवन् ।

तानि कारणानि संक्षेपतो निम्न-लिखितानि सन्ति ।

(i) एतस्मिन्काले ते पोपाः (धर्माध्यक्षाः) विषयवासना-रतास्तथा च राज्याधिकार-लिप्सया गर्विताश्चासन् । ऐहिके-न्द्रिय जन्यं सुखमेव ते परमानन्दं समभन्यन्त । तेषां सदाचारविहीनैर्धर्मैः सर्वथा सम्बन्ध-विच्छेदोऽभूत् ।

धर्मो तथा तेषां उद्वहनादिकं सर्वथा निषिद्धमेवासीत् परं ते गुप्तरीत्या प्रत्यहं स्त्रीसंगरता एवासन् ।

(ii) राजानस्तु एभ्यो रुष्टा एवा-सन् यत इमे राज्ञां स्वराष्ट्रीय-कृत्येष्वप्यनधिकारचेष्टा-मदधुः ।

(iii) इमे पोपा उपादिशन् यत्किमपि बाईबलाख्ये धर्मग्रन्थे लिखितं तदेवास्ति सत्यम् । इतरच्च सर्व-

रूढं मिथ्यैव । परमस्मिन्काले -
साहित्य विज्ञान प्रसारेण लोकैः -
श्वरस्य वचांसि याथार्थ्यं सम्य-
क्तया विचारमासीत् ।

एवं विधे कोपाभिनिवेशा-
रूप सङ्कट जन व्यतिकरे जर्मनी
देशे एकस्मिन्कृषककुले लूथरः
समजनि । तस्योपजातीद् यद्यं
काले यूरोपस्य प्रकाशदिशं परि-
वर्तयिष्यति । अस्य जनकस्यैष -
मभिलाष आसीद् यदयं मम सुतो
नियमशास्त्रमधीत्य प्राड्विवाको
भवतु । परं लूथरस्य तु जन्मत -
एव धर्म विषयेऽभिरुचिरासीत्
लूथरेण सर्वेषां धर्मग्रन्थानां
स्फुटतयाध्ययनताध्यायनं विहि-
तम् । विटनबर्ग विश्वविद्यालयेऽयं
मध्यात्मविद्याया उपाध्यायः
समभूत् ।

एकदायं स्वयं रोमं प्रति ययौ ।
तत्रत्येन स्वनयनेव पोपस्य कु-
त्सितानि विचेष्टितानि
अवलोकितानि । तदानेनाप्रति-
हतया वाग्धारया पोपस्य सर्वं
कुवृत्तं सभ्यक्तया समालोचितम्
स्वकाव्यासवप्रभावेणायं सत्वर-
मेव सर्वत्र प्रसिद्धिमाप । लेख-
मावाचा रचना चास्य रैरप्यपा-
यैः पोपं निनिन्द ।

पोपस्तु प्रथमतो नवधौ । परं
यदा लूथर मतानुयायिनां प्राबल्यं
समभूत्तदासौ लूथरं धर्माद्बहिरच-

कार। परं दूतेन तदीयमाज्ञापत्र-
मार्गमध्ये खण्डशः कृतम्।

एवं विवादः शनैः शनैर्ववृधे।
राज्ञा कस्मिंश्चित् स्थाने विवादनिवा-
रणायैका संसत्समाहूता। लूथरः
स्वसुहृद्भिस्सह सभायां गन्तुं
प्रतिषिद्धः। परमसौ स्वविश्वासै-
कनिष्ठस्तत्र गत एव। राज्ञासौ
कोपविरुद्धं किमपि वक्तुं प्रतिषिद्धः
परं लूथरेणाज्ञा नाङ्गीकृता। एत-
स्मिन्नवसरे राज्ञोऽसौ राज्याद्बहि-
ष्कृतः। तल्लिखिताः सर्वे ग्रन्था-
भस्मसात्कृताः। एतस्मिन्नवसरे
तस्य ~~[struck out]~~ सुहृद्दलस्य
रक्षणाय चिन्तापरा अभवन्।

एकदा स्वसदनं प्रति निवर्तयन्तं
तं सैनिका निगृह्य निन्युः। यैरपि
सुरक्षितं कृतं तैरेव पालितं यदसौ
राज्ञा घातित एव। परं राज्ञा त्वसौ
समाहूतः एव। एवं रक्षणे-
राज्ञा धर्मग्रन्थं प्रचलित भाषाया-
मनुवदितुं आरब्धः, तत्र च तेना-
नूदितो धर्मग्रन्थः।

एवं तेन पापाचरणपरायणानां पोपा-
नां विरुद्धमान्दोलनं प्रारब्धं तथ-
च सत्पथविपथयोऽसौ स्पष्टीकृत्य।
अत्र च कार्ये तस्य कामन्यानूनं
धैर्यञ्चासीत्। यः कोऽपि तेन कार्यं
समारभत। असौ तस्य सहभागी च-
कार तदनुयायिन एतदपमन्यन्त-
पद
धर्माध्यायास्तत्त्वं प्रदन्त स्वधुपा
पिदधत्यासीत् तदनेनास्माकं प्रतः:

समग्रं चरितम्।

लूथर महाशय धार्मिकोऽत्यधिकं सन्तापिताः पोपाख्यैः जीवित एव दग्धाः। एवमत्याचार-प्रचारं सहमानैरपि लूथरमहाशय-धार्मिकैर्न स्वमतं परित्यक्तम्। राज्याधिकारिभिरपि बहुशः एषां निरोधः कृतः, परं तस्य निष्ठैरतं स्वाधिकार रक्षणार्थं प्रयतमानै-रन्ततो गत्वा स्वाधिकारा लब्धा एव।

धन्याः खलु ते जना ये सत्य-रक्षणाय सततं प्रयतन्ते तथा च सत्य रक्षणाय प्राणान् जहति परं न सत्यं जहति।

एवं विधानां पादैः क्षुण्णे-पथि सर्वैरेव गन्तव्यम्।

श्री बालकृष्णः

✻ ✻ ✻ ✻

सुभाषितम्

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्तु ते किमपि तान् प्रति नैष यत्नः।
उत्पत्स्यते ऽस्ति मम कोऽपि समानधर्मा,
कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥

अमृत - वाणी

खरतर धारा करालोऽयं करवा-
ल सत्याग्रहाभिधानः । सर्वैस्स-
र्वदा सर्वथा च प्रयोज्य इति तु
विगलित विचिकित्सं वचः ।
यः कश्चित् स्वातन्त्र्य समीहा-
संमोदमानस्वान्त स्तं प्रयुनक्ति -
सत्याग्रह मण्डलाग्रं स स्वीये नैतेन
शस्त्र प्रहारेणाततायिनोऽपि मङ्गल-
माचरति चरति च धीलीधारण
धौरेयं धर्ममिति विपश्चिदपश्चि
मः प्रमाणम्। प्रहारस्य च
परिणामेन गूढेन गह्वरेन च गूर्यते
नोत्रै नागरिकाणां पारस्पर प्रवृत्ते

रवकारणे न च कथञ्चनापि
हेतुकारणेऽपि परिक्षयमीतिश्च ।
प्रतिद्वन्द्वि प्रयोधने च सत्याग्रह
समर सन्नाह सज्जाः न तन्त्रायन्ते
वीराः । सत्याग्रहतरवारिधारा
धारणाय न कस्यचनास्ति शक्य
कता परीक्षार्थि न च केनाऽपि
सफलाद्यतेनाऽपहारेऽपरस्य
दातुं पार्यत इति ।

× × ×

आस्तिक्य शेमुषीपरिमुषित -
मनोमालिन्यमलीनां सान्द्रानन्द
सर्वव्यापि सद्भाव भावितभावनानां
विदितचरमेव यच्छासनवत्सु
वत्सला गुरुणप्रगल्भमनस्काः केवलं
शरीरराज्य मास्माकीनाना मीशिताः

अस्माकं कलेवरं कारागारे
कुर्वन्तु हन्त मातृमन्दिरमलि-
वासयन्तु च सततं तथा च प्राणा-
पहारकारिणोऽधिकमपि वितरन्तु
नैरन्तर्येण शासकाः परन्तु -
मनांसि मानवानां व्योमविहा-
रिविहङ्गमाः न तत्र कारागारा
अपि शराः गन्तुं समर्थाः।

× × ×

धर्मं चर। मा चर चाऽधर्मं।
सत्यं वद। अप वद चाऽसत्यं
दीर्घदृष्टि द्रष्टारश्च भूयास्त।
संकुचितसमीक्षिणिकया न
क्षणमपि निभालनीयम्।

× × ×

आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च
अहश्च रात्रिश्च उभे च संध्ये
धर्मश्च जानाति नरस्य वृत्तम्

× × ×

भुशुण्डीनां नालीकनिःसृताः
गुलिकाः वक्षांसि विध्यन्

विधर्मिभ्योऽपि सोत्साहं सहनीया
इति तु न काठिन्यकठोरं वचः।
हन्त शालिनितं पारस्परिककलह-
कलङ्ककर्दमं दैवात् आर्यधीर-
प्रकृते मे हृदुःखदायि। काठिन्येन
स्वात्मसंशोधनम् इति वैदुषी वर्णोक्ति
प्रमाणयन्ति।

× × ×

विद्वद्भिः परीक्षितं, साधुभिश्च
सुपालितं, वीतरागैश्च विभावितं
स्वानुभवेन च समनुमोदितं धर्मं
वित्त। नान्यः पन्थाः धर्मतोऽस्ति

× × ×

परोपकरणं पुण्याय परपीडनं
च पापायेति भगवतीं मनीषां
मन्ते लपितम्।

——— ~ ———

" पराजयस्य विजयः "

जननी दीव्यच्छिशु धनि कोऽधर्मिणं, कृषीवलो लसन्तं क्षेत्रमवलोकयन्न्य- मानन्दमनुभवति, तमेव पिता- महो भारती, विलसन्तं वाजिन मवलोकयन्ननुबभूव। भग- वद्रूलेखशिष्टं काले पिता महो वाजिने समर्पयामास। विजित निखिलाश्व सौन्दर्य्यैः अभिभूतोच्चैः श्रावो बलः सुल- तानो नितान्तं तं पितामहममो- दयत्। स्वेन स्नेह सिक्त करेण योजयंस्तं पितामहो भृशं प्र- सादमवाप।

विरहित निखिल साहा- य्य सम्पत् विहित पौरजीवन श्रमः वाजि साहाय्यशेषः स्वल्प कालावशेषाज्जीवितः कृत मुनि वेषो बहिर्ग्राममस्य मन्दिरे सुखेन न्यवसत। तथापि प्रिय वाजि विरह वेदनां कथं कथ मपि सोढुं नाशक्नुवन्। "तदृते न मे जीवितम्" इत्युन्मत्त इव समये समये विललाप। प्रेयसस्तस्य चलनं वीक्ष्य स घडघडाशब्द- मनुजलधरे नृत्यत उन्मत्त मयूर इवाभवत्स्वामिनो भारती। सर्व एव ग्रामीणा इमामाश्चर्य- करीं मोहमायां वीक्ष्य दन्तो- ष्ठ्ये दत्ताङ्गुल्यश्चकिता इव समभवन्। यद्यपि केचिद्

देवगोष्ठी

ग्रामीणास्तं वक्र दृष्ट्यापि द-
दृशुस्तथापि पितामहो न किं-
चिदचिन्तयत।

सायं काले सुलतानारण्यो
यावत्कालं पंचक्रोशमात्रं न
बभ्राम तावन्न कथमपि शान्ति-
माशिश्रिये।

एकदा मध्येऽह्नि तज्जा-
नपदः लोक विख्यात चौर
कर्मा, नाम्ना खड्गसिंहः सु-
लतान कीर्तिं श्रावं श्रावं तद्दर्शन
लालसः प्राप्त पितामह कुटीरः
मुकुलीकृत करः सादरं सप्रश्र-
यं नमस्कृत्योपाविशत्तत्र च
तयोरेवमभूदालापः।

" वत्स खड्गसिंह! कथ-
मसि ? "

" (बद्धाञ्जलिः प्रणम्य) " तात
त्वत्कृपया सर्वमस्ति शुभम् "
" कथय कथमिहागतोऽसि "
" सुलतान दिदृक्षया कृष्ट इहा-
गतोऽस्मि "
" अद्भुतोऽयं पशुः, दर्शन मात्रेणैव
प्रसादमवाप्स्यसि "
" सत्यम्, तस्य चलनं मनस्ते
मोक्ष्यति "
" अद्वितीय सौन्दर्य इति मुहु
र्मुहुराकर्णितम् "
" यत्सत्यम्; एकवारमपि कृत
दर्शनश्चेतसि निहितमूर्ति
रेव निवर्तते "।
" चिरन्तन दिदृक्षा लालसाकुलो
ऽद्य सम्पत्स्यतोऽस्मि "

तदनन्तरमश्वेनैव मन्दुरां जग्मतुः। सगर्वः पितामहोऽश्वं दर्शितवान्, साश्चर्यश्च खड्ग सिंहस्तं दृष्टवान्। यद्यपि खड्ग सिंहोऽश्वसहस्रं दृष्टवाँस्तथापि सुसंघटितं विग्रहमेतादृशं वाजिनं न कुत्राप्यवलोकयत्। आसीच्चास्य चेतसि खड्ग सिंह योग्योऽयम्। साधुरयं किमेते नास्य प्रयोजनम्। एवं किंचित् कालं चित्रार्पित इव निःशब्दः, लोकालोक इव निश्चलः सचिन्तः, साश्चर्यः, सोद्वेगस्तस्थौ। तदनन्तरं बालस्वभाव सुलभयाऽस्थिर चित्ततया प्राह ~~स्वान्तरं~~ "तातः चलतेऽदृष्टे सति न मया किंचिद्दृष्टमिदं मन्ये, अतोऽस्य चलन पाटवं दिदृक्षुरस्मि।

(२)

परमस्वाच्छुत सुलतान कीर्त्तिः पल्लवित चेताः विकसित वदनारविन्दः पितामहो नातमानं कथमपि रोद्धुमशकत। सपद्येव सपदि मन्दुरातो बहिरानीय दत्त्वा पर्याणमुत्प्लुत्य च तत्पृष्ठमारुरोह। वायु प्रवाहेनोड्डीयमानमश्वमवलोकयतः खड्ग सिंहस्य स्वान्ते ससर्पः। चौरः खड्ग सिंहो दृष्टसर्व वस्तुषु स्वाधिकारं मन्यमानः आत्मनोऽनधिकृतं सुलतानं द्रष्टुं कथमपि नापारयत्। अथ "पितामह! नायं त्वदधिकारो भवितु-

ति "उच्चैरुच्चार्य बहिरगात्।

भारती भृशं बिभायकुवति क्षणं खड्गसिंह भय भ्रान्ता रात्रौ धृत दौवारिक व्रतो निद्रामपि न जग्राह। बहवो मासा व्यतीताः परं खड्गसिंहो नाजगाम। पितामहो ऽप्यधुना भयमिदं स्वप्न दृष्टमिव मन्यमानस्ततो निःशङ्को ऽभवत्।

एकदा सन्ध्या समये प्रभातोदित नूतन कलिकेव विकसित वदनः वाजि वर्ण विग्रहाभ्यामुल्लसित चेताः, कुलत्राना रूढः पितामहो भ्रमणार्थं बहिर्ग्राममगात्। यावत्किंचिदध्वानमगात्तावदकस्मादेकस्य दीनस्य सकरुणरुदितमश्रौषीत्।

"श्रीमन्निहतो ऽपि दुःखस्याभितिः" सहसा चाश्रूयत ध्वनिः।

पितामहो ऽश्वं स्तम्भयित्वा तत्रैव तस्थौ। पार्श्वतश्च संतापतापतप्तं रोगिणमेकमपश्यत्। किमस्य किमिति रोदसीत्यपृच्छच्च।

(बद्ध कर सम्पुटः) "दयालो दीने मयि दयस्व। इतः सार्द्धक्रोश परिमितं रामपुर मस्ति मया तत्र गन्तव्यं, वाजिनि मामारोहय. प्रभस्ते शुभं विधास्यति।

"कस्त्वं ते"

"दुर्गादत्त वैद्यस्य नाम भवता श्रुतमेव, तस्याहं भ्राता" पिता

मुहुः स्वयमश्वादवतीर्य रोगिणं चारोहयित्वा करधृतरश्मिरनुवव्राज ।

सहसा सानेगं रश्मिः करादपगता, सच साश्चर्यचकितः स्थिरदृष्टिस्तत्रैव निरराम । सम्मुखं च कपटरोगिणं वाजिनोऽपहर्तारं धावन्तं खड्गसिंहमवलोक्य भयविस्मयपूरितं चीत्कारशब्दमकरोत् । अथ किंचिद्विचार्य्योच्चैरुवाच "स्थीयतामिति"।

खड्गसिंहो वचनमिदं निशम्य सद्यः स्तम्भयित्वा तत्क्षणमेव तस्थौ । सुलतानस्य कण्ठं सप्रेम करेण स्पृशन्नाह "पितामह! न साम्प्रतमेनं दास्यामि

"परं शृणु तावन्मे वचनम्"

एवं शोकसंतप्तमनाश्चिन्तितचेताः विक्षुब्धविरहवेदनः नयने याचितकरुणोऽज इव पितामह आत्मानमेव ब्रुवन् मन्दं मन्दमवादीत् "सहिष्ये तव संकटः" नाहं त्वां याचे, परं वत्स! प्रार्थनामेकां मे स्वीकुरुष्व, अन्यथा न मे जीवितम् ।

"तात! आदिश; आदेशस्तव मौलेन सार्द्धं शिरो धरिष्ये केवलं सुलतानं न दास्यामि"

"सुलतान विषयेऽधुना मा ब्रूहि, अस्मिन्वस्तुनि न मया वक्तव्यम् । ममेयं प्रार्थना यद् घटनेयं मा कस्यापि पुरतः कथनीया।

"तात नयो निशम्याश्चर्य

चकितः म्लानाननो न किंचिदप्य-
वादीदचिन्तयच्च, "मया त्वेनं
गृहीत्वा गन्तव्यं, प्रमुदन्तमेनं
गोप्तुं तातादेशः, नानेन मे प्र-
योजनसिद्धिः" एवं सुचिरं
विचिन्तयता न किंचिदवाधारि।
अन्ततो गत्वा साहसं गृहीत्वा स-
भयः पपृच्छ "तात कस्तत्र
दोषो यस्माद्बिभेति भवान्।

वत्स! उदन्तोऽयं नेत्स्य-
ति चेल्लोकस्तर्हि साधवो -
लोकेऽविश्वासभाजो भविष्यन्ति।

एवमुक्त्वाऽपरिचित इव
मलतानोऽपकृत हरिमन्दिरं
प्रति न्यवर्तत। खड्गसिंहस्तु
तातादेशं स्मरन् विस्मयं ययौ।
आसीच्चास्य चेतसि, कीदृशा
अद्भुतास्तातस्य विचाराः सन्ति।
यत्प्रेमभाजनमवलोक्य तातस्य
मुखाम्बुजमविकसत्। "अ-
स्माद्दूरेण मे जीवितमिति"। आ-
यमाणो रात्रावप्यजागरीत्, यत्कृते
भगवद्भजनमप्यहासीत्, तस्यैव
मुखेऽधुना चिन्तायाः शोकस्य च
लेशमात्रमपि नादृश्यत। लोकाः
साधुषु विषयेऽविश्वासं मा कुर्यु-
रित्यासीच्चिन्तायाः शोकस्य च
मूलकारणम्। तातेन स्वदुःखं सन्त-
प्यस्य दुःखाय विसर्जितम्। नायं
मनुष्यः, देवः कश्चिदयम्।

३.

अथैकदा खड्गसिंहः पु-
ञ्जी भगवत् तमोमयलोकेषु नभ-
सि सम्पाजन निःशङ्कस्तिमिते

निशीथे विगाढायां शर्वर्यां कर-
धृतवाजिरश्मिः साशङ्कः सभयः
शनैः शनैः पितामह मन्दिरं प्रविश्य,
यथास्थानं सुलतानं बद्ध्वा निःशङ्क
द्वारं पिधाय बहिर्जगाम। बहि-
र्गच्छत एव तस्य छायेव पश्चात्ता-
पाया भूपपतन्। ण्यपप्तत

अथ यामिन्यास्तुरीये यामे
पितामहः उत्थाय कृत शिशिर-
सलिलस्नानः स्वप्न दशास्थित
इव मन्दुरां प्रति चचाल। मध्य एव
ज्ञात भ्रमो यावन्निवर्तितुमारभत-
दैव प्रेयसः सुलतानस्य हेषा ध्वनि
मश्रौषीव। तदाकर्ण्य सावेगमन्तः
प्रविश्य पितेव चिरकालोपलब्धं
तनयं वाजिनं सस्नेहमाश्लिष्य

रुचिरं रुरोद। अनन्तरं यावन्म-
न्दुरातो बहिरगच्छत्तावदक्षिभ्यो
श्रु प्रवाहः प्रवहितुं प्रचक्रमे। इयोर्नि
ऽप्यभून्नित त्यागेन भूमावपप्तन्
यत्र बहिर्गच्छतः खड्गासि हस्ता
श्रू वपपतन्त। "श्री गुरुदेवः"

इति।

"हा ! पद्मसिंह शर्मन् !"

~~अद्य अध्यक्षः आर्यसमा-
जेन समाप्ति स्येव भागो प्रतीत्यो
न येति~~

अनभ्र-वज्रपातः

अप्रत्याशितरूपेणास-
मये च हिन्दीसाहित्यस्य सूरी-
स्तं संवीक्ष्य कस्य मानसं
न सन्तप्येत । पंडितपद्म-
सिंह शर्मणा सह कुलस्या-
स्य चिरेण स्नेहसम्बन्ध
आसीत् । स हि खल्वन
आरभ्य मुपाध्यायरूपेणा-
पि समागत्य हृदयेऽस्माक-
मासनं चकार । तस्य हि
खलु ज्ञानेऽपि मौनगुरुत्वं,
त्यागेऽपि च श्लाघाविपर्य-
यां, गम्भीरपाण्डित्येऽपि बा-
लस्वभावं स्मारं स्मारं मनो
विमनायत इव । परमात्मा
तस्यात्मानं शान्तिं प्रयच्छेत् ।

"आर्यसमाजस्य राष्ट्रिय कार्येण सम्बन्धः"

मम सम्मतौ आर्यसमाजेन संघटनरूपेण राजनीतिकान्दोलने भागो न गृहीतव्यः। भागो न गृहीतव्य इत्यस्य नायमभिप्रायो विद्यते यदार्यसमाजेन राजनीतिकान्दोलनानां विरोधः कार्यः। ये जना राजनीतिकान्दोलनेषु कार्यं कुर्वन्ति तेषां निन्दा कार्या। मम कथनस्य तात्पर्यमिदमेव वर्तते यदार्यसमाजेन एतादृग्भ्य आन्दोलनेभ्यः सर्वथा पृथग् भवितव्यम्।

देशहितैषिणः शीघ्रोत्साहशालिनो नवयुवकाः कथयिष्यन्ति यदार्यसमाजेनावश्यमेव राजनीतिकान्दोलने भागो गृहीतव्यः। यदि हि आर्यसमाजः देशसेवाकरणाय एतादृशां स्वकर्तव्यानामपि उपेक्षां कृत्वा तिष्ठति तदास्य जन्म एव निरर्थकं विद्यते। राजनीतिकान्दोलनात् पराङ्मुखेनानेन न कोऽपि लाभ इति। परमस्मिन् विषये ममेदं कथनं विद्यते यत् नवयुवकानामुत्साहस्तु वर्धितुं नहीव भवति शीघ्रमेव च शान्तिमाप्नोति।

नवयुवका अविचार्यैव कथयन्ति
यदार्यसमाजेन राजनीतिका-
न्दोलने भागो गृहीतव्यः।
वस्तुतस्तु आर्यसमाजः राज-
नीतिकान्दोलनेषु सहयोगं
कर्तुं न शक्नोति। आर्यसमाज-
स्य मुख्यं कार्यं विद्यते धर्म-
प्रचारः। परं राजनीतिकान्दो-
लनेषु कदाचिद्धर्मविरुद्धा-
न्यपि कार्याणि भवितुं शक्नु-
वन्ति। उदाहरणार्थं कस्मि-
श्चिदपि हिंसात्मके राजनीतिका-
न्दोलने स्त्रीणां मतादरो भवितु-
मर्हति। आर्यसमाजः स्त्रीणां
मतादरं सोढुं न शक्नोति।
वैदिकधर्मानुसारं केनापि
नरेण स्त्रीणां मतादरो हिंसा
वा न कार्या। अत एव एता-
दृश्यामवस्थायामार्यसमाज
राजनीतिकान्दोलने कथमपि
कर्तुं नार्हति। परमार्यसमाज-
स्तु एतादृशस्य राजनीतिका-
न्दोलनस्य विरोधमेवाचरि-
ष्यति। केचिज्जनाः कथयन्ति
यदार्यसमाजस्य संस्थापकेन
महर्षिणा दयानन्देन वेदे शिक्ष
शासनं ग्रामिव कथितं
स्यात् यस्मिन् राज्ये सुख-
बाहुल्यं प्रजानाम्। विदेशीया-
नां राज्यमभूतमिवोऽपि स्या-
न्न यस्मिन् दुःखबाहुल्यं प्रजा-
नाम्।

अत एव महर्षेर्दयानन्दस्य
कथनमनुसृत्य आर्यसमाजेन
शीघ्रातिशीघ्रं स्वदेशस्य
भारतवर्षस्योत्कर्षं स्वातन्त्र्य
प्राप्त्यर्थञ्च महान् यत्नः कार्यः
भारतस्य स्वातन्त्र्यप्राप्तिमा
मार्यसमाजस्येदं मुख्यं
कर्तव्यं विद्यते यत् सोऽवश्य-
मेव राजनीतिकान्दोलने भागं
गृह्णीयात्
यद्यप्येतत् सत्यं वर्तते यत्
वैदेशिक शासनं न कदापि
स्वीकर्तव्यं तथापि संस्थया
धर्मस्य नाममात्रप्रयोगो विद्यते
यत् बालविवाहनिषेधादि गुरु-
तरभारमालस्तार्यसमाजेन राज-
नीतिकान्दोलनेऽपि भागः
गृहीतव्यः। अद्यत्वे आर्यसमाजे-
न स्वदेशस्य भारतवर्षस्यो-
द्धाराय बहूनि कार्याणि स्व-
हस्ते गृहीतानि सन्ति। तानि
कार्याणि अपि सम्यग् पूरयितु-
मार्यसमाजः साफल्यतामु-
भवति। एतादृश्यामवस्थाया-
मार्यसमाजः कथमपि एकं स्वतन्त्रं
राजनीतिकान्दोलनस्वरूपकार्यं
स्वीकर्तुं न समर्थः। यदि आर्य-
समाजः राजनीतिकान्दोलने
भागं गृह्णाति तदा तस्येदं
कार्यमुचितं न प्रतीयते।
निजार्यसमाज, एका धार्मिक
संस्था विद्यते, अत एव

अस्य मुख्यं कार्यं वर्तते। स्व-
धर्मस्य पवित्र वैदिकधर्मस्य
सर्वस्मिन् जगति प्रचार एव
अस्याः संस्थाया अन्तिम उ-
द्देश्यं वर्तते। उदयकार्यं
जातिसुधार विधत्ते। कार्यमिदं
परित्यज्य आर्यसमाजः अ
किमपि कर्तुं न समर्थः।
केचिज्जनाः कथयिष्यन्ति
यत् आर्यसमाज एतान्यस्पृश्यो-
द्धारप्रभृतीनि कार्याणि
कुर्वन् अपि राजनीतिकान्दोलने
भागं ग्रहीतुं समर्थोऽस्ति।
यस्माद्धि समाजस्य मुख्यमुद्देश्यं
जगदुपकारकार्यं विद्यते स
एव. यदि [illegible]

राजनीतिकान्दोलनात् परा-
ङ्मुखो भवति तदा का नाम संस्था
राजनीतिकान्दोलने सहयोगं
करिष्यति। यदि हि आर्यसमाजः
स्वदेशस्यैवोन्नतिं कर्तुं न समर्थः
यदि स वैदेशिकानामत्या-
चारेभ्यः भारतमिदं मोक्तुं न
समर्थः तदा कथं स सर्वस्मिन्
जगति शान्तिं सुखञ्च सम्पा-
दयिष्यति। यदि हि आर्यसमाजः
सर्वस्य जगतः उपकारकरणं
मुख्यं कार्यं मन्यते तदा तेनावश्य-
मेव भवितव्यः प्रथमं भारतस्योद्धारा-
य राजनीतिकान्दोलने भागो
ग्रहीतव्य इति।

श्री …:

आर्यसमाजस्य राष्ट्रियकार्येण सम्बन्धः

परमस्मिन् विषये मयेदं वक्तव्यं वर्तते यत् यद्यप्यार्यसमाजः जगदुपकारकरणं स्वं मुख्यमुद्देश्यं मन्यते तथापि अद्यापि इयं संस्था नाति विस्तृता वर्तते अद्यापि आर्यसामाजिकानां संख्या अत्यल्पा वर्तते। यद्यपि पञ्जाबादिदेशेषु आर्यसमाजेन पर्याप्ता उन्नतिः कृता विद्यते तथापि अद्यापि वैदिकधर्मानुयायिनः स्वल्पा एव सन्ति नराः। अतएव आर्यसमाजोऽस्पृश्योद्धारबालविवाहनिषेधप्रभृतीनि कार्याणि कुर्वन् अन्यदेकं राजनीतिकान्दोलनरूपं कार्यं कर्तुं न समर्थः। केवलमस्य तात्पर्यमभिप्रायो वर्तते यत् केनापि वैदिकधर्मावलम्बिना राजनीतिकान्दोलने कार्यं न कर्तव्यम् परं केवलमिदमेवाभिप्रैति यत् स्वाशक्ततया आर्यसमाजेन संघटनरूपेण कार्यं न करणीयमस्ति राजनीतिकान्दोलने अद्यापि वयमवलोकयामः यत् सहस्रशः आर्यसामाजिकाः जनाः राजनीतिकान्दोलने कार्यं कुर्वन्ति। किन्तु एतदपि सत्यं वर्तते यदस्मिन् राजनीतिकान्दोलने आर्यसामाजिकानां जनानां पर्याप्तो भागो विद्यते परमयं समाजः संघटनरूपेण कार्यं कर्तुं नार्हति।

श्री भारतभूषणः

प्रेम

यदि हि भवन्मित्रताया मूले तत्प्रेमास्ति
येनैकस्या मानवपरस्य आत्मने उदन्या
संभवेत्, येन भवत् हृदये उन्नत
तरं उन्नेतृ सुभावना स्रोतः समुद्भवेत्
यत् भवन्तं धर्मे तथा सत्य पथे पद प्रचालने
प्रेरयेत्, यावत् तथा दुःखानि तमो कूप
टनं प्रभांशुः भवेत् तर्हि निश्चिन्तता
रहितमिदं यत् भवत्कं प्रेम एकः प्रदीप्त
दीपो वर्तते। यस्तया कृशानो ज्वालया
ज्वालितो यः प्रकाशस्तम्भ रूपेण स्थितो
अन्तिमं लक्ष्यं प्रति भवन्तमाह्वयति,
स्वयं च अग्रे गच्छन् भवन्तमपि नयति
नयति। अरे प्रेम पथ प्रणताः ! त्वं प्रसर!
इदं प्रेम ज्योतिः स्वकीयमात्मीयं विधाय
ज्योतिः सङ्कोचं निरविरोधं प्रसर। त्वं सोद्देश्यं
लप्स्यसे। प्रेम इति अक्षरद्वयमात्रो लघियान्
शब्दोऽतीव मधुरो मनोहरः सुन्दरश्च वर्तते।
सत्यं प्रेम च उभावपि समानार्थकौ। प्रेम
तु मानवज्योतिः जीवन ज्योतिः वर्तते।
मानवीताया सत्यं स्वरूपं प्रेमैव विद्यते। य
द्यभिलषति भवान् प्रेमान्वेष्टुं जगति, गच्छतु
तावत् अबोध्य राशि वत् निष्कलङ्कस्य अबोधस्य
अबोधकस्य शिशोः पार्श्वे। शिशुत्व एव मधुरं
प्रेम संचितं विद्यते। बालस्य सरलताया एव निष्कलुष
तासहितं स्वाभाविकञ्च प्रेमः स्वरूपमवलोक्यते।
महात्मा गान्धिरपि प्रेम मूर्तिः प्रेमावतारः
अस्य प्रेमापि बाल स्वभाव सुलभम्।
बालकेष्वेव अधिकं स्फुरति।

स बालकानेवातितरां स्व प्रेम प्रभावेण प्रभावयति । इङ्गलैण्ड देशे बालकास्तस्य प्रातः कालिके प्रवचनेन सह गर्न्तुमुत्सुका उत्फुल्ल नेत्राश्चाभवन् । त एव सर्वतोऽधिकं तस्य ओर भाजनानि आसन् । स तु राजनीतावपि प्रेम प्राविशयत् । भारतीय स्वातंत्र्यान्दोलनस्य मूले प्रेम एव विद्यते ऽयस्य मोहनदासोऽपि अहिंसायाः सिद्धान्तस्य प्रेम्णो वा प्रचारम् करोत् । एवं सर्वत्र जगति परमात्मनः सत्य स्वरूपे प्रेम अवलोक्यते । प्रेम पीयूष पानाभिलाषुक । स्यामः स्नेह सरसी स्नातुमुत्सुका । भवेम ।

लेखकः

सुरेशचन्द्रः

६६ पृष्ठस्य शेषांश:

क्रीड़ा —:

गतवर्षे क्रीड़ामन्त्री सम्यगतया साफल्येन स्वमन्त्रित्वं न्यवारयत्। एवञ्च महती क्रीड़ायाः समुन्नतिः समजायत। व्यायामशालाया अपि परिवर्तितं रूपमतीव सुन्दरमभवत्। ब्रह्मचारिणोऽपि सोत्साहं क्रीड़ासु भागमगृह्णन्। एवमेवास्मिन् वर्षेऽपि नवीनः क्रीड़ामन्त्री उत्साही वर्तते। तेनाऽपि क्रीड़ासु नवजीवन संचारः कृतोऽस्ति। ग्रीष्मकालेऽपि सर्वेषामुपस्थितिरावश्यकी विद्यते। व्यायामशालायामपि कैश्चिज्जिमनास्टिकमभ्यस्यते। केचन दोलायां दोलायन्ते, केचन मल्ला भूत्वा मल्लयुद्धमपि कुर्वन्ति। अस्मिन् वर्षे 'बास्केट बाल' इदं नवीनं वस्तु वर्तते। नौकानयनस्य कार्यमपि नवीनं विद्यते। नौका नयने ब्रह्मचारिणामुत्साहोऽवलोक्यते। श्रेणीषु प्रान्तीय दलेषु च टाकी साम्मुख्यं विधीयते। आशास्यते यन्नवीन उत्साही मन्त्र्यस्मिन् वर्षे क्रीड़ाया उन्नतिं विधास्यति।

पत्रम्

श्री वादरविनोदेषु

पितामह! अगाधोऽयं भवतां
विद्यावारिधिः शैलोऽयम्,
कथमपि पारं भवतां वा न ल-
ब्धुमर्हामि। शैशवादारभ्याद्य
-यावत् मे चेतसि भवतां प्रहस-
प्रतिकृतिः प्रतिबिम्बितास्ते।
बालबुद्धिवाद बालक्रीडायां भवतां
प्रलम्बमानश्मश्रोराकर्षणं क्रियते
पुनरावर्तमानोऽयमिति मे चेतसि
बहुशः समायाति, भवतां सर्वमपि
कृत्यजातं सर्वदैवास्माकं मान-
न्दयितुं विविधमार्गेषु वासीत्।
परं तस्मिन् समये भवद्भिः कदापि
हसितुं प्रतिपाठे।

नाधानि। परं न जाने, अधुना
किमर्थं मातुलगृहे स्थिता भवन्तो?
मां भक्तिभाजं बहु सततं कर्तु-
-बद्धा एव प्रतीयन्ते। कोऽर्थोऽस्य
किञ्च तात्पर्यम् न जाने किमर्थं
प्राचीनसंस्कृतिमेव प्रशस्यतरं
स्थापयन्ति भवन्तः। यत्किञ्चित्
भवतां समक्षं आसीत् तदा विशेषित
स्वरूपं सर्वमासीदन्यच्चापि
समये पाश्चात्य उद्भूते तत्सर्वं
प्रतिकूलं भवति तु न। प्रश्न-
विषयेऽस्मिन् किञ्चिद् वक्तव्यं
अत्र चेदस्ति भवतां व्यवहार
प्रणाल्याम् अतिक्रमो भवेत्

कनिष्ठोऽपि भवेत् तन्नाम्ने नासौ
गुरुः, वाल्मीकिरपि नाऽबाधितः
प्रहृष्ट एव प्रतीयतेऽयम् ।
केवलं कृते माधुर्ये मन्यमा-
नस्याप्यपूर्वा परिचर्या न सम्यक्
फलति । यतो हि तस्यापि
प्रकृतिजं प्रेम नास्ति,
एतादृशां पुरुषाणां हृदये प्रप-
न्नं बीजं स्वदेशस्य विदेशीय-
बीजमिव नाङ्कुरत्वमेति । एवं
स्वकालिकं तदङ्कुरणमेव नास्ते-
-र्पयोगिनि कार्ये कण्टकत्वमाव-
-ति । अन्यच्च सूक्ष्मदृष्ट्या चेद-
वलोक्यते नासौ पुरुषो न च
वर्तमाने जातः । किन्तु अतीत एव
तस्य जन्म वर्तमानमहं तदेव

तस्य कण्ठे प्रतिवसति
दादाजी ! यद् भवन्तः स्वसमय-
मेव निर्वहन्ति, तत् स्नेहसमा-
चरणं भवतां गुणगणे शोभितः
ऐतस्य गगने एको गुणः ।
तदनेन प्रतीयते यद् वृद्धाः स्व
समयसम्मेलनसम्बद्धसंस्काराः
सुसमाहिताः । भवन्तो हि
जनन्याः जनकस्य च भक्तिभाज
आसन् । यथाकुलारं समाचरे
दत्वा धात्वा च प्रीतिपूर्णं
हृदयकञ्जं प्रकाशयत् समर्पो-
पयोग्य । तत्र वयं स्वकर्तव्यं
समुचितरूपेण परिपाल्य सुखं
दिनकरकिरणावली सौख्यं वास्माकं
समर्थो प्रवृत्तां समुज्ज्वलता-

देवगोष्ठी-:

मौ: शौकत अली - महोदयस्य नतनम् ।

"भवभूतिवृत्तम्"

जन्मपरिचयः —

तत्रभवान् निखिल महाकवि-
कुलसततोपगीयमानतुहिना-
चलामलकुमारवदातविशोभित
पवित्रकीर्तिः कोविदकलाप-
कुञ्जर शिरःशेखरो भवभूतिः
कस्मिन् देशे कदा वाभूदिति
निर्णेतुं नातिदुष्करं विद्यते।
विदर्भ राज्ये बरार इति आ-
धुनिक हिन्दीभाषायाम्
पदमपुरमिति ख्यातम् पृथुलं
स्थानं वर्तते। तत्र नवमे शतके
काश्यपगोत्रो ब्राह्मणो नील-
कण्ठ नामकः कश्चित्
न्यूषतः जतुकर्णीमित्याताया
एव प्रियापाधानलभत भवभूति
मात्मजम्। प्रमत्त दिवू मृदु
सुमभिवर्त तं ज्ञान
क्षितं सर्वेषां सुखकरमभूत्।
अजं स्वले द्विषन्तपे पुषित
प्रतापि श्री यशोवर्मणि नृपे
कन्नौज भुवं शासति कविरयं
तदाश्रये ऽवतस्थे। कविनाऽ-
नेन एव निर्मितग्रन्थे उत्तर-
रामचरिते स्वपरिचय इत्थं
प्रदत्तः " अस्ति खलु तत्र-
भवान् काश्यपः श्रीकण्ठपद
लाञ्छनः पदवाक्यप्रमाणज्ञो
भवभूतिर्नाम जतुकर्णीपुत्रः।

कविनानेन स्वनिर्मित ग्रन्थेषु विस्तरेण स्वपरिचयः दत्तः स्तथाप्यस्य कवेर्नाम विषये ऽपि बहुविवादो विद्यते विद्वत्सु जनेषु। केचित् कथयन्ति यदस्य कवेर्नाम भवभूति विद्यते श्रीकण्ठश्चोपाधिः। तथा च लोकातिशायिकवित्वसमृद्धि भूषितत्वादस्य कवेः तदानीन्तनैः विद्वद्भिः श्रीकण्ठ इति विशेषणं परिकल्पितम्। भवस्य ईश्वरस्य भूतिः ऐश्वर्यमिव भूतिः ज्ञानसम्पद् यस्य तथाविधो भवभूतिरिति अन्वर्थ नामा इति भावः। अपरे च श्रीकण्ठ एवास्य कवेः नाम विद्यत इति कथयन्ति।

~~अन्येऽपि~~ अस्य कवेः "साम्बा पुनातु भवभूतिपवित्र मूर्तिः"। तपस्वी कां गतोऽवस्थामिति श्लेषरतना[illegible]। "गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ"। इत्यादिकं मनोहरं श्लोकमाकर्ण्य सन्तुष्टेन राज्ञा भवभूतिरिति नाम्नैवैषः सततमाहूतः आसीत्। तथा च श्रीकण्ठ इति पदं शब्दः लाञ्छनं नाम यस्य तथोक्तः श्रीकण्ठनामकः आसीत् कविरयम्। किञ्च पितुः नीलकण्ठ इति नाम सादृश्येनापि श्रीकण्ठ एवास्य नाम इति कथयन्ति। ~~अस्य कवेः~~ अस्य कवेः त्रीणि पुस्तकानि उपलभ्यन्ते तेषां नामानीमानि

सन्ति — महावीरचरितं,
मालतीमाधवं, उत्तररामचरित-
ञ्चेति। अस्य कवे: पुस्तकानां
निर्माणकालविषयेऽपि विवादो
विद्यते। अस्मिन् विषयेऽस्माकं
त्विदं मतं यत् कविरयं सर्वत:
प्रथमं महावीरचरितं स्वस्मिन्
शैशव एव अरचयत्। अनन्तरं
मालतीमाधवं कनौजे राजा-
श्रये न्यवसत् प्रणिनाय।
अन्ते च वृद्धावस्थायां उत्त-
ररामचरितमकरोत्। त्रयाणां
पुस्तकानामवलोकनेन कवेर-
न्यस्य सरलता सम्यक्
प्रतिभाति। इदं निर्विवादमेव
अस्ति यत् महावीरचरितं
उत्तररामचरितात् पूर्वमेव

विरचितं कविना। इदञ्च
पुस्तकं सर्वत: प्रथमं लिखितं
म्। अस्मिन् कथने कारणानी-
मानि सन्ति।

१ रचनादृष्ट्या इदं पुस्तक-
मपेक्षया ताभ्यां न्यूनमेव
विद्यते।

२ विषयदृष्ट्या उत्तरराम-
चरितात् पूर्वं लिखितम्।
अस्मिन् पुस्तके रावणवधपुर
सरमयोध्याप्रत्यावर्तनं विद्यते
रामस्य। उत्तररामचरिते तत
उत्तरं रामचरितं वर्णितं विद्यते।

३. किञ्च रसदृष्ट्यापि अयं
ग्रन्थ: पूर्व एव विद्यते। अस्मिन्
पुस्तके वीररसस्य प्राधान्यं
विद्यते।

उत्तररामचरिते करुणरसस्यैवाभि
व्यक्तिः। उत्तररामचरिते —
'एको रसः करुण एव निमित्तभेदात्
भिन्नः पृथक्पृथगिवाश्रयते विवर्तान्।
आवर्तबुद्बुदतरङ्गमयान् विकारान्
अम्भो यथा सलिलमेव हि तत्समस्तम्॥'
इत्यस्मिन् श्लोके भावः स्पष्टं द्रष्टुं
शक्यते।

भवभूतिसमये शूद्राणां स्थिति
रुन्नता नासीत्। शूद्रः तपश्चर्या
दिकान्युत्तमानि कर्माणि कर्तुं नार्हति
इति प्रतीयते। यतोहि उत्तररामचरि-
ते द्वितीयाङ्के कविना लिखितं यत्
'शम्बूको नाम वृषलः पृथिव्यां
तप्यते तपः। शीर्षच्छेद्यः स ते राम!
तं हत्वा जीवय द्विजम्॥'
इत्युपश्रुत्य कृपालुपाणिः
पुष्पकं विमानमधिरुह्य सर्वा
दिशो विदिशश्च शूद्रतापसा-
न्वेषणाय जगत्पतिः समां
समारभत्' इत्यनेन ज्ञायते
यत् कोऽपि शूद्रः तपश्चर्यादिभि
कर्मभिः स्वोत्कृष्टवर्णमधिगन्तुं
नाशक्नोत्। अन्यथा निरपराध
स्य तपः तपस्यतस्य शम्बूकवृषल
स्य हननेन कः लाभः स्यात् भगवतो
रामचन्द्रस्य।

भवभूतिसमये ब्राह्मणा अतीव
पूज्या आसन्। तेषां वचनेषु जनाः
श्रद्दधत इति प्रतीयते। वशिष्ठ
वाल्मीकिच्यवनप्रभृतयः सर्वेऽपि
ऋषयः राज्ञः रामस्य पूज्या आसन्

किञ्च उत्तररामचरिते ऽरुन्धती
कथयति कौशल्यां प्रति —
"जानन्त्यपि किं न स्मरसि यदवोचत्
ऋष्यशृङ्गाश्रमे भगवान् कुलगुरुः।
भवितव्यं तथेति उपजातमेव।
किन्तु कल्याणोदर्कं भविष्यतीति"
अग्रे पुनः कथयति - "तत्किं भगवत्या
राजपुत्रि! मृषोद्यं नदिति। तद्धीदं
सुभाषितेऽन्यथा मन्तव्यं भवितव्य
मेव तेन —
आविर्भूतज्योतिषां ब्राह्मणानां,
ये व्याहारास्तेषु मा संशयोऽभूत्।
भद्रा ह्येषां वाचि लक्ष्मीर्निषक्ता,
नैते वाचं विप्लुतार्थां व्याहरन्ति"।
तदानीन्तना जनाः ——...
ब्राह्मणानां वचसि बहु श्रद्धवन्त।

ब्राह्मणपुत्रस्य जीवनार्थं निर-
पराधमपि शूद्रं हन्तुमन्वमोदन्त
जनाः।
उत्तररामचरितस्याध्ययनेन ज्ञायते
यत् भवभूतिकाले मांसभक्षणस्य
प्रचार आसीत्। तात्कालिकाः
जनाः शास्त्रप्रमाणैः मांसभक्षणम्
अपुष्णन् किञ्च अतिथिसत्कारार्थं
मांसमपि भक्षणीयम् आहुः।
उत्तररामचरिते चतुर्थाङ्के कविः
मांसभक्षणं प्रतिपादयति। तत्र
सौधातकिभाण्डायनयोः वार्तालापे
मांसभक्षणस्य वर्णितप्रकारः एवं
विधो वर्तते। समागतातिथि
सत्कारार्थं [illegible]
[illegible] सौधातकिः

~~कवि:~~ कविताया: प्रारम्भकाले वीररसमेव स्वभावत आश्रयत्। वीररसे हि कविता सरलतया जायते।

महावीरचरिताध्ययनेनाव-गम्यते यदयं कवि: उत्तरभारतं नागच्छत् तावत् पर्यन्तं गृह एव महावीरचरितं व्यरचयत्। उत्तररामचरिताध्ययनेन प्रतीयते यदयं कवि: बहुकालानन्तरं स्वगृहे न्यवर्तत। तस्मिन् समये तस्य जीवने महत्परिवर्तनमभवत्। यदायं कवि: बहुकालानन्तरमुत्तरभारतात् स्वगृहं न्यवर्तत तदैव उत्तररामचरितं व्यरचयत्। कविरिदं "पुरा यत्र स्रोत: पुलिनमधुना तत्र सरितां विपर्यासं यातो घन विरलभाव: क्षितिरुहाम् बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं, निवेश: शैलानां तदिदमिति बुद्धिं द्रढयति" इत्यस्मिन् श्लोके तत्रत्यां तदानीन्तनीं परिवर्तितां दशामदर्शयत्। गृहं प्रति निवृत्तेनैव तेनायं श्लोको विनिर्मित:। महावीरचरिते इदं परिवर्तनं नैव दृश्यते। किञ्च स्वस्मिन्नेव स्थाने न्यवसत् कोऽपि कवि: इत्थं वर्णयितुं नार्हति।

महावीरचरितेन स ख्यातिलाभानुकूलं यश: नाप्नोत्। अतएव नितरां खिन्नोऽयं कवि: "ये नाम केचिदिह" इत्यादिभि: श्लोकै: स्वकीयं मालतीमाधवे प्रदर्शयति।

दैवगोष्ठी

शृङ्गाररसमवलम्ब्य तेनेदं पुस्तकं
लिखितम्। यशस्योपलब्धये।
महावीरचरितमालतीमाधवयोः
प्रस्तावना समानैव विद्यते।
उत्तररामचरितस्य प्रस्तावना
अपेक्षया भिन्ना स्वल्पा च
विद्यते। मालतीमाधवमतिक्लिष्टं
वर्तते तस्य वाक्यानि प्रायशः
सुदीर्घसमासवन्ति सन्ति।
मालतीमाधवेनापि कविः यशः
आप्नोत्। उत्तररामचरिते लेखन
समये तस्य यशः पर्याप्तमासीत्।
अतएव उत्तररामचरितस्य प्राक्
एव सूत्रधारः कथयति —
" यं ब्रह्माणमियं देवी वाग्वश्येवानु
वर्तते। उत्तरं रामचरितं तत्प्रणीतं
प्रयोक्ष्यते इति"।

उत्तररामचरितेन स बहुयशो
लभत्। मालतीमाधवं पुस्तकं
मलिनकृतिर्वर्तते इति वक्तुं
न शक्यते। उत्तररामचरितेन
स यशः नाप्नोत् अतएव
मालतीमाधवे स्वकीयं कोप
प्रदर्शयन् कविरिति विश्व-
सितुं नैव शक्नुमः। प्रतिद्वन्द्वेयं
लोकोक्तिः अस्त्येव विषये 'उत्तरे
रामचरिते भवभूतिर्विशिष्यते'
इति। अस्य कवेः तिसृषु पुस्तकेषु
उत्तररामचरितमेव सर्वोत्कृष्टं
वर्तते।

ललितादित्येन यशोवर्मा जि
पराजितो हतो कविरयं ललिता
दित्यस्याश्रयमवाप। इदं पुस्तक
मवलोक्य समुपजात कौतुकः कविः

शिष्यात्ध्याय सम्भावितमायां।
प्रीतिं मधिगच्छन् तेष्वहास्ते
तेषु वशिष्ठस्य शिष्यस्य पृच्छता
भाण्डायन प्रश्नेन तस्य वशिष्ठ
इति नाम्ना कर्पितवत्सतरी
सहित मधुपर्कं गृहीतात् कूलाधि-
त्वेन सम्भावित प्रतीयते उप-
हसत्। ततः तत्सहाध्यायी भाण्डा-
यनो मधुपर्कस्य समांसत्व-
मित्थं प्रतिपादयति "समांसो
मधुपर्क इति आम्नायं बहु-
मन्यमानाः श्रोत्रियायाभ्यागत-
ताय वत्सतरीं महोक्षं वा महाजं
वा निर्वपन्ति गृहमेधिनः तं हि
धर्मसूत्रकाराः समामनन्ति।
~~पुन~~ ततः सोऽप्यात किला
जनकाय दधिमधुनिवैव

~~किमर्थं प्रदत्तः मधुपर्कः इति~~
~~पृष्टे भाण्डायनः~~
किमर्थं प्रदत्ताः मधुपर्कः इति
पृष्टे भाण्डायनः निवृत्तानिवृत्त
मांसभेदेन तस्य व्यवस्थामकरोत्।
कल्पयन्निदमेवाभिप्रैति यत् तस्मिन्
समयेऽपि न केवलं साधारणजनाः
अपि तु ऋषयोऽपि मांसभक्ष-
काः आसन् इति प्रतीयते।

लेखकः श्री भारतभूषणः

सम्पादकीयम्

राष्ट्रिय महासभा.—

अखिल भारतवर्षीय राष्ट्रिय महासभाया वार्षिकाधिवेशनं दिल्ली-नगरे अप्रैल मासस्य चतुर्विंशत्यां तिथौ समजनि। तत्र च मनोनीतः सभापतिर्मालवीयो भारतभूषणः श्री पं. मदन मोहन मालवीयो दिल्लीनगर प्रवेशात् पूर्वमेव कालिन्दी सेतावेव कनिष्ठबलै गृहीतः। अपरत्र च भारत कोकिला, कलरव कूजन रामा, उत्फुल्लनेत्रा, भारत भाग्य विधात्री, विकसित सरोजनीव सरोजनी देवी मुख्यायां नगर्यामेव स्टेशनोपरि निगृहीता। तत्र च दिल्ली नगरे शासकैः सर्वस्मात् देशात् गुप्तचराः पुलिस कर्मचारिणश्च विशेषतया महासभाया अधिवेशनं मसम्भवमिति कर्तुमाकायन्त। दिल्लीनगरं सर्वत्र पुलिस कर्मचारिभि गुप्तचरै धार्य क्षेत्रं ^{शलभ} दलमिव आच्छादितमासीत्। सन्देहे प्रत्येकं खद्दरधारी निरुद्धो गृहीतश्च। महासभाया विभिन्न प्रान्तीयानां प्रतिनिधीनां तु का कथा? महासभाया मनोनीतः स्वागताध्यक्ष प्यारेलाल शर्मा महोदयोऽपि मयराष्ट्रे (मेरठ) निगृहीतः। स्वागत समितेः सर्वे सदस्या अपि गृहीताः। सर्वे प्रतिनिधयः स्व स्थानात् प्रस्थानानन्तरमेव गृहीताः। दिल्ली नगरेऽपि महासभायाः प्रतिनिधीनामति कठोरं निरीक्षणमासीत्।

सम्पादकीयम्

इदृश्या मवस्थायां सत्यामपि दिल्ली नगरे द्वि सहस्र संख्याकाः प्रतिनिधयो विभिन्न प्रान्तेभ्यः समायपुरिति महदाश्चर्य मेव। पुलिस कर्मचारिणो बहु दृष्टय आसन्। यत् कुत्र भवति विषयनिर्धारिण्याः समितेरधिवेशनम्। परन्तु ते अस्मिन् कार्ये नितान्त मसाफल्यं प्राप्नुवन्। पञ्च प्रस्तावाः स्वीकृताः, विषय निर्धारिण्याः समित्या अधिवेशनमपि गुप्त स्थाने। चतुर्विंशत्यां तिथौ घण्टागृहे महासभायाः द्वे अधिवेशने अभूताम्। प्रथमाधिवेशनं एक घण्टा पर्यन्तम्। द्वितीयञ्च दश मिनट पर्यन्तम् श्री रणछोडदासस्य सभा पतौ अभूत्। एवं अस्मानि स्वलो कथ्यते यद्यपि शासकाः बहु परिश्रान्ता आसन् महासभायाः अधिवेशनम् विफलीकर्तुम् तथापि महात्मा अतितरां साफल्यं लेभे। महासभायाः संघटन माश्चर्य जनक मासीत्। सर्वेऽपि शासकाः चकिते चकिता आसन् महात्मा यः संघटन मवलोक्य। अस्मिन्नवसरे भारतवर्षस्य राजधान्यामेव महासभया घण्टानादमाहूय, आङ्गलशासकाना-मक्षिषु रजः प्रक्षिप्य, ते आङ्गलाः पराभूताः। येषां राज्ये ~~सूर्य~~ सूर्यो न कदा अस्तं याति। इदं प्रति भाति यदस्मा भिराङ्गल सहस्र दीधिति रित्यनीम्।

अस्मिन् सम्मुख युद्धे आङ्गलैः शासकैः प्रत्यक्षीकृतम् महासभायाः संघटनम्। महत्या जनतायाः प्रतिनिधित्वं च। अधुना आङ्गलैः शासकैरिदं स्वीकर्त्तव्यम्

यद् महासभा न केवलमेका संस्थैव
स्वजनानां पुरुषाणा मपितु सकलस्या
भारतीय जनताया: सर्वतोमुख्या प्रति
निधि संस्था। अत आशास्महे यच्छा
शका: महात्मानं गांधिनं कारागारान्मु
क्त्वा संधिचर्चां विधाय महासभाया:
सकलानपि प्रस्तावान् स्वीकृत्य भारतं
स्वप्रतीज्ञानुसारं स्वतन्त्रं विधास्यति।

सिक्खानां राजनीतौ भाग: —

सौभाग्येन डा. गोकुलचन्द नारङ्ग.
इत्यस्य प्रयत्नेन चिरकालात् समागत:
उत्का प्रदेशस्य सिक्खहिन्दूनां पारस्परिक:
कलह: प्रशान्त:। तेन चेदानीं ते:
गुरुगोविन्दसिंहस्य सिंहै: सिक्खै: रा
जनीतौ च भागो गृह्यते। देहली
महासभाया अवसरे द्विशतमिता:
सिक्खा: समागत्य, विगृहीताश्च
शासकै:। लवपुरेऽपि लॉरेन्स मूर्ते
(Statue) अपि लेखन्यौ खण्डितेमे
इदानीं च समाचार पत्रेषु पठ्यते, यदेक
सहस्र संख्याका अकाली सिक्खा
दिल्ली नगरे सीसगंज गुरुद्वारे इति
स्थाने सत्याग्रहं विधास्यन्ति। तेषां
सुबुद्धयर्थमि धन्यवाद:।

दक्षिण अफ्रीका वास्तव्या: भारतीया:

केप टाउन सम्मेलनस्य फल
स्वरूपं दक्षिण अफ्रीका भारत शासक
योर्य: समय: सम्जाति तस्य प्रति-
ज्ञा भारतीय शासकै: अप्रैल मासस्य
पंचम्यां घोषिता: विद्यन्ते। तासां —
सारांशोऽयमेव — " इदं स्वीकृतम्
विद्यते यद् आर्थिक साहाय्यं प्रदाय
भारतीयान् भारत वर्षे प्रेषणाय —

यूनियन शासनस्य योजनाधुना क्रिया-
मेकरूपेण न सम्भवति। भारतस्य
आर्थिकी स्थिति जलवायुश्च प्रतिकूलौ।
इदमपि दक्षिणस्या अफ्रीकाया: स्थितेषु
कालोनि भारतीयेषु आफ्रीकि प्रतिशतकं
जनास्तत्रैव जाता: सन्ति। फलत: भारते-
तरे कस्मिन्नपि देशे तेषां उपनिवेश-
स्थापनं विचार्यते। अस्मिन् कार्ये
यूनियन शासनाय भारत शासन मपि
साहाय्यं प्रदास्यति। उपनिवेश मार्गस्य
कार्यं अस्मिन्नेव वर्षे प्रारप्स्यते। यदि
दक्षिणस्या अफ्रीका निवासिनो भारतीया:
तत्र अभिलषिष्यन्ति नहिं तेषामपि
एक: प्रतिनिधि रूपस्थां सन्निधाय
भविष्यति। यूनियन शासन स्वकल्पा-
नां स्थायी रूपेण स्थितानां भारती-
यानां मुक्तयै पूर्ववत् प्रयतिष्यते।

भारत शासनस्यापि दूतस्तत्र-
स्थास्यत्येव। ट्रान्सवाल एशियाटिक
टैन्योर (संरक्षणस्य) स्वरूपं एवं परि-
वर्तितम्। यद् भारतीया: कस्मिन्नपि
निश्चित स्थान एव व्यापारं भूमिक्रयं
च विधातुं शक्नुवन्ति। अस्मिन् सम्बन्धे
पञ्चम धारा विलोपयिष्यते। सुवर्ण
नियमोऽपि परिवर्तितं भविष्यति। उपनि-
वेश स्थापन विषये अमेरिका महाद्वीपे
ब्राजील, इत्यस्य नाम कथ्यते।

चीनजापान संग्राम:

चीन जापान संग्रामस्य मूले जापान-
स्य स्वार्थनीति रेव दरीदृश्यते। वस्तु-
त: स्वार्थमय: संसार:। सर्वेऽपि
देशा: स्वीयं कार्यं स्वार्थमेव दृष्टि-
पथे निधाय कुर्वन्ति। एव मेव जापान:
आरम्भ मञ्चूरिया प्रदेशं अधिकर्तुमैव

देवगोष्ठी

-चीन वास्तव्यान् पीडयति। यत: अरीय मंचूरिया प्रदेश: चीनजात्या पूरसितस्य व्यापार: उन्नत दशायां विद्यते। तत्र यद्यपि चीनवास्तव्यानां बाहुल्यमस्ति तथापि जापान प्रदेशीया: न सहन्ते तेषां प्राबल्यम्। जापान प्रदेशीया: चीन प्रदेशीयान् पारतन्त्र्य पिञ्जरे पिञ्जरीकर्तुं प्रयता:। युद्धस्य स्थानेऽपि तत्र धूम्रपान विषये कलहोऽस्ति। इदं स्पष्टं वर्तते जाता: सम्प्रति, यत् चीन जापानावुभावेव राष्ट्र संघस्य सदस्यौ स्त:। परन्तु जापानेन राष्ट्र संघं तिरस्कृत्य तदुक्तां सूचना-मवगणय्य इदं क्रूर कर्म्म मनुष्ठितम्। इति अत्यन्तमनुचितम्। नि:शस्त्री-करण परिषदि २००० प्रतिनिधय लब्धेऽवसरे: प्रतिनिधय:, जापानस्य सन्ति, तथापि जापान: स्वयुद्धाय उद्यत:, अधुना सर्वेरेव राष्ट्रै: जापानस्यास्य कर्म्मण: निन्दा क्रियते।

आयर्लैण्डस्य क्रान्ति: —

यत: डी. वेलरा महोदय: आयरिश पार्लियामैण्टस्य प्रधानमंत्री निर्वाचित: तत एव एका नवीना क्रान्ति: दृश्यमानतामुपैति। डी. वेलरा महोदय: शपथ सम्बन्धिनं नियमं निष्कासयिष्यति। एवमेव भूमि भाग (Land annuities) मपि न दित्सति। डी वेलरा महोदयेन एकदा कथितं यत् "शपथ विषये जनतायाः आदेश: मान्य: यं पालयितुं अस्माकं दृढ निश्चय:, वयं इंग्लैण्ड प्रति मैत्री भावं रक्षाम:। परं स्वीकीय देश वासिनां

सम्पादकीयम्

प्रत्यादि कर्तव्यं पालयाम:",

इदमपि सत्यं यत् डी. वेलरा महोदयेन निश्चितम् यत् इंग्लैण्डाय प्रति वर्षं दीयमाना ३९०००००० रु. राशि यदि न प्रदास्यते। अनेन ब्रिटिश मन्त्रिमण्डलमान्दोलितम्। पार्लियामेण्टे वस्तूपनिवेश मन्त्रिणा थॉमस महोदयेनोक्तम्, यत् आयर्लैण्डस्य संधिभंगोऽयम्। इंग्लैण्डस्यानुदार दलस्य नेतारः कथयन्ति यद्यपि आयर्लैण्ड: वार्षिक-करं न दास्यति तर्हि तद्देश निर्मित वस्तुषु अधिकः करो निधातव्यः शपथ निस्सारणं, भू कर निवारणं च डी. वेलरा महोदयः संधिभंगम् न मन्यते। तेन बहुभिः प्राड्विवाकैः सह चिन्तितम् — अन्याय्यं संधिभङ्गः। यद्यपि - आयर्लैण्ड निवासिनोऽपि सर्वे न सहमताः, यथा कॉसग्रेव महोदयः। कॉसग्रेव महोदयेन अस्य कथितं क्रियते यत् शपथ निवारणे डी. वेलरा महोदयस्य मूर्खता, मिथ्याभिमानं च वर्तते। तथापि डी.- वेलरा महोदये आत्मविश्वासोऽस्ति अतः डी. वेलरा महोदयस्य शुभकामनां कामयेमहि। आयर्लैण्डस्य क्रान्तिः सफला भूयात्।

गुरुकुलीयाः समाचाराः

ऋतुः - अद्य श्री गुरुकुले मासात् प्रभृति मार्शिली, एव- वीर्यैः प्रखरैः सन्तपति अतितरां मध्याह्न काले। प्रातः कालः रमणीयः। रात्रावपि अधुनाऽपि न तथा विद्यते। शीतल शशि शुभ्रहास विलासोऽपि न यदि दृश्यते तथापि, रात्रावमन्द मन्द हसेन वायुप्रवाहः प्रवहति नीरहर (नहर) ²दुकूले ¹कूले रात्रौ ब्रह्मचारिणः एव मण्डली- -भूय परि शयन्ति।

तत्र च चम्पक कुसुम स्तबकोत्- क्षिप्त रजः कण मिश्रित मारुतः ब्रह्मचारिणां चित्त माह्लादयति।

अद्यत्वे नीरहरे (नहरे) स्नानस्य आज्ञा नास्ति अत एव गङ्गाजला- यां निपुणास्तितीर्षवो ब्रह्मचारिणः उत्सुकाः उत्सुक नेत्राभ्यां भूत्वा चि- कित्सक महोदयस्याज्ञां प्रतीक्षन्ते कौतुक तथा यदि विधीयते ब्रह्म- चारिभिः। तत्र चास्वतन्त्रमानन्दं लभन्ते। ब्रह्मचारिणां स्वास्थ्य मत्युत्तमम्। चिकित्सालये द्वित्रा एव ब्रह्मचारिणः रुग्णाः सन्ति

नोट् - लेखानन्तरं विज्ञायते यन्नीरहरे स्नानस्याज्ञा श्रीमता चिकि- त्सक-महोदयेन प्रदत्ताऽतश्चाद्य ते सर्वेऽपि नितीर्षवः छात्राः नीरहरमुप- यास्यन्ति।

<u>गुरुकुले नूतनाति परिवर्तनानि</u>

<u>अभिनन्दनम्</u> - अस्माकं भूतपूर्वाचार्यः प्रो. रामदेव महोदयः अस्य कुलस्य षड्विंशति वर्ष पर्यन्तं अनवरत पूर्विकां सेवां विधाय अस्मात् स्थूल रूपेण, अधिकारि रूपेण - पृथग् भूतः, परन्तु तस्य सम्बन्धस्तु नैव विद्यते। स तु इमां कुलमातुः वाटिकां स्व रुधिरेणासिंचत्। तस्य वियोगः सर्वैरेव कुल वासिभिः तीव्र रूपेणानुभूयते। स तु मूर्ति रूपेणैव संस्था आसीत्। किन्तु सार्थमेव इदं दृश्यस्य स्थानं विद्यते यत् सः स्व प्रतीज्ञानुसारं वर्तमान राष्ट्रियान्दोलने राष्ट्रस्य महतीं सेवां कर्तुं गतः। बहिः स्थितोऽपि सः गुरुकुलं चिन्तयत्येव+ अहर्निशम्। प्रभु-कृपया प्रार्थयामहे यत् स दीर्घ (आ। भूयात्) देश धर्म जाते अधिकां सेवां विदधातु।

<u>नूतन आचार्यः</u> - पूर्वाचार्य स्थाने अधुना नवीनः आचार्यः श्री पं. देव शर्मा विद्यालङ्कारः समागतः। स तु ~~सरल~~ एवं कुल पुत्र एव। तस्य देश-प्रेमः स्वभाव क्रियात्मक सेवा वृत्तिः, सरल जीवनादि विविध गुणानां विषये कथनं सूर्याय दीपक प्रदर्शनमेवेति न वक्तुं लिख्यते, एतादृशस्योपयुक्तस्याचार्यस्य लाभेन सौभाग्यम् आत्मनो वयमिति मन्यामहे। स्वकीय सेवा प्रति स्वेच्छानुसार स्वल्पेनैव

पृ०.

देवगोष्ठी

कालेन कृतैः सुधारैः प्रदर्शितं, स्वदेशि प्रचार, मद्य निषेध, अस्पृश्योद्धार, ग्राम संगठनादयो विभिन्न विविधास्तदुत्तरं कार्यं शीघ्रमेव भविष्यति इति आशास्यते।

भोजनानन्तरं च फलानि च सर्वैः ब्रह्मचारिभिः भोजयितव्यानि इति आज्ञापि प्रदत्ता।

<u>नवीनो मुख्याधिष्ठाता</u> – आचार्य रामदेवस्य स्थाने नवीनो मुख्याधिष्ठाता श्री उपाध्यायः शिवदयालु महोदयः अस्थायि रूपेण निर्वाचितः, ततः कार्यं च सहायक मुख्याधिष्ठातृ रूपेण यथा पूर्वं श्री उपाध्याय देवराज सेठी महोदयः करोति।

<u>नवीनः उपाचार्यः</u>, भूतपूर्व उपाचार्यस्य श्री पं. विश्वनाथ विद्यालङ्कारस्य स्थाने श्री उपाध्याय लालचन्द्र महोदय आचार्यस्थानीय सहायक रूपेण कार्यं करोति। ~~श्री प्रो० आनन्द स्वरूपस्य~~

श्री प्रो. आनन्द स्वरूपस्य गमनानन्तरं रसायनोपाध्यायस्य महती न्यूनता अनुभूयते। आशास्यते यच्छीघ्रं पूरयिष्यन्ति अभावमेनम् गुरुकुलाधिकारिणः।

<u>कारागार गृहगताः ब्रह्मचारिणः</u> अष्ट गुरुकुल ब्रह्मचारिणः (प्रकाशवि, राजेश्वर, भगवति, ज्ञानेन्द्र, मधुव्रत, मेधाव्रत, जगदीश) —

देश सेवार्थे स्वाध्यायं विहाय
राष्ट्रिय महा युद्धे गुरुकुल स्नातका
विद्यार्थिनश्च भागं गृहीतवन्तः।
ग्राम प्रचारं कुर्वन्तः, देहली राष्ट्रि-
य महा सम्मेलने : कार्यं कृत-
वन्तः। तत्र च क्रूर शासकैः
कारागारे निक्षिप्ताः, न ज्ञायते
कीदृशी दारुणी तेषां अवस्था, —
भोजनादि व्यवस्था च। विविध
बन्दि तेषां कारागृह वासः इति
तेष्वपि ब्र. मेधाव्रत स्नातकोऽप्येव
सामाजिकारणैर्वञ्चितः। देहली
सेण्ट्रल जेल इत्यस्मिन् वर्तते।
अन्ये च 'कैम्प जेल' इत्यस्मिन्
स्थिताः।

सम्पादिकम् -

अस्य वर्षस्य प्रारम्भ एव सभा-
सु गत वर्षापेक्षया उत्साहोऽव-
लोक्यते। निर्वाचनानि सम्पन्नानि,
साप्ताहिकाधिवेशनानि विधीयन्ते,
विशेषाधिवेशनानाम् सूचनाः
प्रकाश्यन्ते, पत्रिका अपि प्रका-
श्यन्ते, नूतनं वक्तारः प्रादुर्भवन्ति
इति सभानां सौभाग्यमेव प्रतीयते।
आशास्यते च एताभिः सभाभिः
पत्रिकादिभिः च ब्रह्मचारिषु गुप्ता-
श्च लेखकाः वक्तारश्चोत्पत्स्यन्ते।

हरि.

देव गोष्ठी

संस्कृत गोष्ठी

गतवर्षे उत्साहिता गोष्ठ्या स्व-
सामर्थ्यानुसारं संस्कृत साहित्यस्य
सम्वर्धनार्थं वक्तव्यानि, निबन्धानि
कवितानि च सोत्साहं श्रावितानि।
धन्यवादार्हा एषा गोष्ठी, यतः पूर्वं
अनुभव वृद्धौ सति सदस्याः। यः
अनुभवेन वर्धितं सभापतिः कार्य
सञ्चालितं + देवगोष्ठ्याः उन्नतिं च
प्राकाशयत्। [अस्मिन्नपि प्रति*
योगिता सम्मेलनम्, राज कवि
सम्मेलनम्. प्रतिभा सम्मेलनम्
चायोजयिष्यते।]*

सभायाः निर्वाचनम् अस्मिन्
मासे एव यत्र कर्षणीयं सम्पन्नम्। तत्र
च ब्रह्मचारी सुरेशचन्द्रः, ब्र. बाल
कृष्णश्च क्रमशः मंत्री संयुक्त
मंत्रिणौ च निर्वाचितौ।

कार्यकारिण्याः निम्न सदस्याः
निर्वाचिताः :- ब्र. जगपालः १४, ब्र.
भरत भूषणः १५, ब्र. हरिदत्तः १५
ब्र. ओमदत्तः १३. ब्र. जयव्रतः १२
ब्र. वेदव्रतः ११. ब्र. रामनाथः १२.

अस्मिन्नपि वर्षे प्रतियोगिता-
सम्मेलनम्, राज कवि सम्मेलनम्
प्रतिभा सम्मेलनं च आयोजयि-
ष्यते। प्रतियोगिता सम्मेलनं
मई मासस्य अष्टाविंशति तिथौ
भविष्यति, तत्र च विवाद वादस्य
विषयः "भारतीय प्राचीन
संस्कृतिः पाश्चात्य संस्कृतिं वि
जयते" इत्यस्ति।

तत्र च त्रीणि पदकानि (येषु-द्वे सौवर्णे एकं च राजतम्) प्रदास्यन्ते। सहजं सर्वेऽपि समायास्यन्ति इति आशास्यते।

मई मासस्य अन्तिमायां तिथौ राजनीति सम्मेलनं विधास्यते। यस्य साहित्याचार्यः वाचांमीशो आचार्य विद्यालङ्काराः, एवं नूतनां स्नातां रचयिष्यन्ते।

जून मासस्य पंचम्यां च तिथि मा सम्मेलनम् सम्मेलयिष्यति। यस्थं सर्वैरपि कुलवासिभिः तत्र एव प्रतिमाः प्रदर्शयितुं श्लोक निर्मिते कार्यमति शीघ्रं प्रारब्धम्।

तदर्थं नियमाः शीघ्रमेव इह श्रावयिष्यन्ते। सहायता निधिकेन्द्रादि विधास्यन्ते। पत्रिका अपि प्रकाश्यते प्रथमोऽङ्कः मासत्रयेषु इत्येवं च अस्ति। यथा शान्ति निकेतनः - गुरुकुले लेखस्य कलायाः च प्रचारेण संस्कृतसाहित्यं समाजं सम्प्रदायं उत्साहं च वर्धयितुं प्रयतिष्यते। सभा अपि लेखादि प्रदानेन सभाया विविध कार्येषु भाग ग्रहणेन संलिप्तः अध्यक्षा सहयोगीनां च स उत्साहं वर्धयिष्यन्ति इति प्रार्थ्यते। सर्वशक्तिमान् भूतभावनः प्रभुः अपि शक्तिं ददातु इति अहर्निशं प्रार्थ्यते।

देवगोष्ठी

वाग्वर्धिनी

गत वर्षे वाग्वर्धिन्याः अधि-
वेशनानि न सफलतया अभवन्
विशेषाधिवेशनानां तु कथा।
हिन्दी साहित्य सम्मेलनस्य तु वि-
षये सम्पादितेनापि कथयत् "यन्नू-
नं न भविष्यति" एवमेव राज-
हंसोऽपि विलुप्त प्राय आसीत्
अति प्रयत्नवद्भिरपि न दृश्यते स्म
राजहंसः कुत्रापि। सभायाः नि-
र्वाचितो मंत्री अस्मिन् वर्षे
वेदव्रतः उपमंत्री च शिवकुमारः।
अधुना उत्साही मन्त्रिणि, सूदते
न मद्राज हंसस्यास्य वर्धिष्व प्रयत्नाः
प्रकाशयिष्यन्ते। कविता गल्प सम्मे-
लनमपि मार्च मासस्य प्रथमायां तिथौ
भविष्यति। सम्प्रति महासभा, वर्तु-
मंचक परिषद्, हिन्दी साहित्य सम्मेलनाः
साप्ताहिकानि कार्यकारिण्या विशे-
षाधिवेशनानि आयोजितानि। ~~स्मिन्~~
स्मिन् अद्यावधि माणिक लाल
वकील महोदयेन द्वे व्याख्याने
स्वदेशीय व्यापार विषये
अभूताम्। एकस्मिन्नधिवेशने
आचार्य रामदेवेन देहली कांग्रेस

नम्र निवेदनम्

अयि वाचकाः !

देवगोष्ठ्या अयमङ्को भवतां सम्मुखे समुपस्थितः। अतिशीघ्रमयं प्रकाशितो विद्यते; अतो ऽस्मिन्नङ्के अतिन्यूनतानुभूयते। प्रसङ्गेऽस्मिन् यैः खलु लेखादिप्रेषणेन कार्यकरणेनेतररीतिभिर्वाङ्कस्यास्य प्रकाशने सहाय्यं व्यधायि न त उपेक्षणीयाः तेभ्यो भूयो भूयो धन्यवादराशयः वितीर्यन्ते।

भावत्कः

~~संस्कृतोत्सलिका~~

सम्पादकः

कविता गल्प-सम्मेलनम्.

अद्य वाग्वर्धिन्या 'कवितागल्प सम्मेलनं आयोज्यते. आशास्यते यत् सर्वेऽपि तत्रागत्य सम्मेलनस्य शोभां वर्धयिष्यन्ति।